# || संस्कृत कथा नाटक कौमुदी ||

## प्रथमः पाठः

# गार्गी-याज्ञवल्क्यसंवादः

*[ प्राचीन भारत में नारियों की उच्च शिक्षा और दार्शनिकता के प्रमाणस्वरूप **गार्गी-याज्ञवल्क्यसंवादः** नामक शीर्षक वृहदारण्यकोपनिषद् से लिया गया है। इसमें मिथिला के महाराजा जनक द्वारा आयोजित यज्ञ में आये महर्षि **याज्ञवल्क्य** से ऋषि **वचक्नु** की परम विदुषी पुत्री **गार्गी** का विद्वत्तापूर्ण शास्त्रार्थ दर्शाया गया है। शास्त्रार्थ के अन्तिम प्रश्न के रूप में गार्गी ने पूछा–"हे याज्ञवल्क्य! यह आकाश किसके आश्रित है?" इस पर याज्ञवल्क्य ने उत्तर दिया, "हे गार्गी! यह आकाश परब्रह्म से ओत-प्रोत है।" यह सुनकर गार्गी पूर्ण सन्तुष्ट हो गयी और वहाँ पर उपस्थित अन्य ब्राह्मणों से बोली, "सम्माननीय ब्राह्मणो! ब्रह्मवाद विषय में याज्ञवल्क्य को जीतनेवाला आपके मध्य में कोई नहीं है, इसलिए आप सभी इन्हें नमस्कार करके अपने-अपने घर जायँ।" यह कहते हुए गार्गी ने अपनी वाणी को विराम दिया। ]*

आसीत् पुरा मिथिलायां जनको नाम राजा। एकदा सः बहुदक्षिणेन यज्ञेन ईजे। बहुदक्षिणतया प्रसिद्धे तस्मिन् यज्ञे विद्वद्भूयिष्ठकुरुपाञ्चालदेशेभ्यः ब्राह्मणाः समागताः। एवं बहुषु ब्राह्मणेष्वागतेषु यष्टुं प्रवृत्तस्य राज्ञः मनसि विजिज्ञासा बभूव, कः स्विदेषां ब्राह्मणानां ब्रह्मविद्यानुवचनकुशलः इति। राजा जनकः स्वजिज्ञासाप्रशमनार्थं स्वगोष्ठे स्वर्णशृङ्गयुताम् गवां सहस्रमवरुरोध।

अथ सः तान् ब्राह्मणान् प्रत्यकथयत्–"हे भगवन्तः ब्राह्मणाः! भवतां मध्ये यो ब्रह्मिष्ठः, स एताः गाः स्वगृहं नयतु" इति। एवं वदत्यपि जनके न कश्चिदपि ताः गाः नेतुमुद्यतो बभूव। तूष्णीमुपगतेषु समस्तेषु ब्राह्मणेषु तेष्वन्यतमः याज्ञवल्क्यः स्वशिष्यमित्थमुवाच–"हे सोमार्ह! एताः गाः अस्मद्गृहान् नयतु" इति। सः ताः तद्गृहान् नेतुमुद्यतो बभूव। याज्ञवल्क्येन ब्रह्मिष्ठपणस्वीकारेण तदितरे ब्राह्मणाः क्रुद्धाः बभूवुः। ते सर्वे सकोपम् याज्ञवल्क्यमूचुः यत् कथं नः अनादृत्य त्वमात्मानं ब्रह्मिष्ठं मन्यसे?

ततः विदेहाधिपतेः जनकस्य होता अश्वलनामा प्रथमेव याज्ञवल्क्यमपृच्छत् यत् समवेतानां बहूनामस्माकं मध्ये कथं त्वमेव ब्रह्मिष्ठोऽसि? याज्ञवल्क्यः तं प्रत्युवाच वयं ब्रह्मिष्ठाय नमस्कुर्मः, नास्माभिर्ब्रह्मिष्ठत्वाभिमानाद् गावो नीताः, किन्तु गोकामा वयमित्यतो गोकामनया एव गाः नीताः। एतच्छ्रुत्वा अश्वलप्रमुखाः केचिद् ब्राह्मणाः याज्ञवल्क्यं पराजेतुमुद्यताः बभूवुः परं न तैर्जितो याज्ञवल्क्यः।

अश्वलादीनां विदुषां पराभवानन्तरं तत्रोपस्थिता वाचक्नवी गार्गी तेन सह शास्त्रार्थं कर्तुमुद्यताभूत्। सा पप्रच्छ–हे याज्ञवल्क्य! यदिदं दृश्यमानं पार्थिवं सर्वमप्सु ओतञ्च प्रोतञ्च, ताः आपः कस्मिन् खलु ओताः प्रोताश्च। याज्ञवल्क्यः प्रत्यवादीत्-वायौ इति।

**गार्गी** : वायुः कुत्र?
**याज्ञवल्क्यः** : अन्तरिक्षलोकेषु गार्गि!
**गार्गी** : कुत्र खलु अन्तरिक्षलोकाः?
**याज्ञवल्क्यः** : अन्तरिक्षलोकाः गन्धर्वलोकेषु कार्त्स्न्येन आश्रिताः।
**गार्गी** : भगवन्! गन्धर्वलोकाः कस्मिन्?

**याज्ञवल्क्यः** : आदित्यलोकेषु गार्गि!
**गार्गी** : आदित्यलोका: कुत्र ओता: प्रोताश्च?
**याज्ञवल्क्यः** : चन्द्रलोकेषु।
**गार्गी** : चन्द्रलोका: कस्मिन्?
**याज्ञवल्क्यः** : गार्गि! नक्षत्रलोकेषु।
**गार्गी** : कस्मिन्नु खलु नक्षत्रलोका: कार्त्स्न्येन व्याप्ता:?
**याज्ञवल्क्यः** : देवलोकेषु देवि !
**गार्गी** : देवलोका: कुत्र?
**याज्ञवल्क्यः** : इन्द्रलोकेषु देवलोका: समाहिता:।
**गार्गी** : हे याज्ञवल्क्य ! इन्द्रलोका: कस्मिन् कार्त्स्न्येन व्याप्ता:?
**याज्ञवल्क्यः** : प्रजापतिलोकेषु गार्गि !
**गार्गी** : कुत्र खलु प्रजापतिलोका: साकल्येन समाहिता:?
**याज्ञवल्क्यः** : हे गार्गि! प्रजापतिलोका: ब्रह्मलोकेषु ओता: प्रोताश्च।
**गार्गी** : ब्रह्मर्षे! कुत्र खलु ब्रह्मलोका:?

गार्ग्या: इमं प्रश्नं निशम्य याज्ञवल्क्य: प्रत्यवदत्–हे गार्गि ! ब्रह्मलोकमप्यतिक्रम्य तत: ऊर्ध्वस्य तदाधारस्य प्रश्नं मा कुरु, अन्यथा चेत्ते मूर्ध्न: पतनं भविष्यति। एवम् कथिते च याज्ञवल्क्ये गार्गी उपरराम। अथ उद्दालक: याज्ञवल्क्येन सह वादं कर्तुमारभत। परं विश्रुते ब्रह्मविदि उद्दालके याज्ञवल्क्येन पराजिते, समेषां ब्राह्मणानामेवमेव पराजयो भविष्यतीति मन्यमाना गार्गी याज्ञवल्क्यस्य सक्रोधोक्त्या भीत्या पूर्वमुपरतापि ब्राह्मणानुज्ञां प्राप्य पुन: प्रष्टुकामा अनुज्ञादानाय ब्राह्मणानुवाच–हे ब्राह्मणा:! इमं याज्ञवल्क्यमहं प्रश्नद्वयं प्रक्ष्यामि। यदि मे प्रश्नद्वयस्योत्तरं याज्ञवल्क्यो वक्ष्यति, तदा युष्माकं मध्ये न कश्चिद् तञ्जेतुं शक्त:। याज्ञवल्क्योऽयं यदि न प्रतिवक्ष्यति, तर्हि अस्यापि मूर्धा विपतिष्यति। अथ ब्राह्मणानामनुमतिं लब्ध्वा सा प्रथमं पृष्टवती–"हे याज्ञवल्क्य ! द्युलोकाद् यदूर्ध्वं वस्तुजातम्, पृथिव्याश्चाधस्तनं यद्वस्तुजातम्, अनयोरन्तरालवर्ति यत्, ये चेमे द्यावापृथिव्यौ, कालत्रयपरिच्छिन्नं यद्वस्तुजातम्, एतत्सर्वं कुत्र वा ओतं प्रोतञ्चेति ब्रूहि।" याज्ञवल्क्य: प्रत्युवाच–"हे गार्गि! एतत्सर्वमाकाशे कार्त्स्न्येन व्याप्तम्।" एतदनन्तरं गार्गी च अकथयत्–"हे याज्ञवल्क्य ! यस्त्वं मे प्रश्नमिमम् विविच्योक्तवानसि, तस्मै ते नम:। द्वितीयप्रश्नाय चित्तं सावधानं कुरु।" याज्ञवल्क्य: आह–"हे गार्गि! पृच्छेति।" एवं वदति याज्ञवल्क्ये गार्गी पुनरपृच्छत्–हे याज्ञवल्क्य! सोऽयमाकाश: किमाश्रित:? स: प्रत्यूचे–हे गार्गि! आकाशस्त्वक्षरे परब्रह्मण्येव ओत: प्रोतश्च। याज्ञवल्क्येनैवं प्रत्युक्ता सन्तुष्टा च गार्गी तत्र समवेतान् तान् ब्राह्मणानाह–हे भगवन्तो ब्राह्मणा: ! युष्माकं मध्ये इमं याज्ञवल्क्यं ब्रह्मवादं प्रति नैवास्ति कश्चिदपि जेता। अतो नमस्कृत्य स्वं स्वं स्थानं गच्छन्तु तत्रभवन्तो भवन्त:। एवमुक्त्वा सा तूष्णीं बभूव।

# काठिन्य निवारण

**आसीत्** = था। **पुरा** = पहले। **बहुदक्षिणेन** = प्रभूत दक्षिणावाली। **ईजे** = यज्ञ किया। **विद्वद्भूयिष्ठकुरुपाञ्चालदेशेभ्य:** = विद्वानों की अधिकतावाले कुरु और पाञ्चाल जैसे देशों से। **समागता:** = एकत्रित हुए। **ब्राह्मणेष्वागतेषु** = आये हुए ब्राह्मणों में। **यष्टुं** = यज्ञ के लिए। **प्रशमनार्थं** = शान्त करने के लिए। **स्वगोष्ठे** = अपनी गोशाला में। **स्वर्णशृङ्गयुताम्** = सोना युक्त सींगोंवाली। **अवरुरोध** = एकत्र किया। **ब्रह्मिष्ठ:** = ब्रह्म विद्या में निपुण। **नयतु** = ले जावें। **नेतुमुद्यतो** = ले जाने के लिए आगे बढ़ा। **पण** = मूल्य। **तदितरे** = उनके अतिरिक्त अन्य। **अनादृत्य** = अपमान करके। **होता** = ऋग्वेद का ज्ञाता। **अश्वलनामा** = अश्वल नाम का। **पराजेतुमुद्यता:** = पराजित करने के लिए प्रयास किये। **वाचक्नवी** = वचक्नु की पुत्री गार्गी। **पार्थिवम्** = पृथ्वी से उत्पन्न। **अप्सु** = जल में। **ओतञ्चप्रोतञ्च** = सर्वत्र व्याप्त। **कार्त्स्न्येन** = पूर्णरूप से। **निशम्य** = सुनकर। **अतिक्रम्य** = अतिक्रमण करके। **उपरराम** = रुक गयी। **आरभत** = आरम्भ किया। **विश्रुते** = प्रसिद्ध। **मन्यमाना** = मानती हुई। **उपरतापि** = रुकी हुई। **अनुज्ञादानाय** = अनुमति लेने के लिए। **मूर्धा** = शिर।

**प्रतिवक्ष्यति** = उत्तर देंगे। **कालत्रय परिच्छिन्नम्** = भूत, भविष्य, वर्तमानरूपी समयों से व्याप्त। **अन्तरालवर्ति** = बीच में रहनेवाला। **अकथयत्** = कहा। **विविच्य** = विवेचना करके। **प्रत्यूचे** = उत्तर दिया। **समवेतान्** = एकत्रित। **जेता** = जीतनेवाला। **तत्रभवन्तः** = आदरणीय। **आह** = बोली। **नैवास्ति** = कोई नहीं है। **स्वं स्वं** = अपने अपने। **गच्छन्तु** = चले जायँ। **तूष्णीं बभूव** = चुप हो गयी।

## अभ्यास-प्रश्न

१. निम्नलिखित प्रश्नों के उत्तर संस्कृत में दीजिए–
   (क) जनकः कः आसीत्?
   (ख) जनकस्य यज्ञे कुतः ब्राह्मणाः समागताः?
   (ग) ब्राह्मणाः क्रोधितं कथं अभवन्?
   (घ) याज्ञवल्क्यः कः आसीत्?
   (ङ) अश्वलः याज्ञवल्क्यं किम् अपृच्छत्?
   (च) गार्ग्याः प्रथमप्रश्नस्य याज्ञवल्क्यः किम् उत्तरं दत्तवान्?
   (छ) गार्ग्याः द्वितीयं प्रश्नं किमासीत्?
   (ज) याज्ञवल्क्यः द्वितीयप्रश्नस्य किम् उत्तरं दत्तवान्?

२. प्रस्तुत पाठ के आधार पर गार्गी का चरित्र-चित्रण कीजिए।

३. प्रस्तुत पाठ का सारांश अपने शब्दों में लिखिए।

## वस्तुनिष्ठ-प्रश्न

**निम्न प्रश्नों के सही विकल्प लिखिए–**

१. मूर्ध्नः शब्द है–
   (क) एकवचन (ख) द्विवचन
   (ग) बहुवचन (घ) कोई नहीं

२. (i) जनकस्य होता ............................................... आसीत्।
   (क) गार्गी (ख) अश्वलः
   (ग) याज्ञवल्क्यः (घ) उद्दालकः

   (ii) इन्द्रलोकेषु ............................................... समाहिताः।
   (क) चन्द्रलोकाः (ख) देवलोकाः
   (ग) प्रजापतिलोकाः (घ) आदित्यलोकाः

   (iii) आदित्यलोकाः ........................................ ओताः प्रोताश्च।
   (क) इन्द्रलोकम् (ख) गन्धर्वलोकाः
   (ग) चन्द्रलोकेषु (घ) देवलोकेषु

## ➡ आन्तरिक मूल्यांकन

गार्गी जैसी विदुषी इस बात की द्योतक हैं कि प्राचीन भारत में भी नारियाँ उच्च शिक्षित थीं। यदि आप भी किसी विदुषी के बारे में जानते हों, तो अपने विचार व्यक्त कीजिए।

●●●